M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

No. Ser. [illegible]

Title: Somavati Puja

772

सोमवती पुजा

Somavati Puja	:	Title
	:	Author
	:	Editor
	:	Year, Vols.
	:	Publisher
772	:	Remarks

७७२

अथसोमवतीपूजाप्रारंभः

सो म व० श्रीगणेशायनमः अथसोमवतीपूजाप्रारंभः ॥ अद्येत्यादि०
ममइहजन्मनिजन्मांतरेच अखंडितभर्तृसहसकलसौभा
१ ग्यादिपुत्रपौत्राद्यभिवृद्धि अखंडित अप्राप्तलक्ष्मीप्राप्त्यर्थं ३
प्राप्तलक्ष्मीचिरकालसंरक्षणार्थं श्रीअश्वत्थरूपीलक्ष्मी
नारायणप्रीत्यर्थं अश्वत्थमूलेयथामीलितोपचारैःपूजन
शो२ महंकरिष्येतिसंकल्प्य ॥ तत्रादौकलशपूजनंचकरिष्ये ॥ कल दो२ १
शस्यमुखेविष्णुः० पूजार्थंदुरितक्षयकारकाः ॥ वरुणायन
रि

मःचंदनादिपंचोपचारैःसंपूज्य ॥ कलशोदकेनपूजाद्रव्ये
णप्रोक्ष्य ॥ अथध्यानं ॥ शांताकारंभुजगशयनं० ॥ सर्व
लोकैकनाथं ॥ इतिध्यानंसमर्पयामि ॥ ब्रह्माविष्णुशिवा
दीनांस्थानत्वंवृक्षराट्स्वयं ॥ अंगैःसर्वैसहस्वामिन्
स्थातव्यंच [illegible] मयाप्रभो ॥ श्रीअश्वत्थरूपीलक्ष्मी
नारायणाभ्यांनमः आवाहनंसमर्पयामि ॥ व्यक्ताव्य
क्तस्वरूपायसृष्टिस्थित्यंतकारिणे ॥ आदिमध्यांत

सोमव० ह्रीनायविष्टरश्चैवसेनमः॥ आसनंस०॥ मृलानिब्र
त्मणोयस्यऋग्वेदांगानिपर्वताः॥ फलानियज्ञशाखा
२ श्चैवाज्ञयामेदयंकुरु॥ आसनंस०॥ सर्वतीर्थ
मयोयस्मात्सर्वदेवमयोयतः॥ सर्वतीर्थांबुभिस्तस्मा
त्पाद्यमावत्सराद्धस्वयं॥ पाद्ययोःपाद्यंस०॥ आपोधर्म
स्वयंहीजंआपोधर्मःसनातनः॥ अर्घ्यःपवित्रंदा २
तव्यंगृहाणार्घ्यंनमोस्तुते॥ अर्घ्यंस०॥ पाटलोशि

थं
रकर्पूरसुरभिस्वादुशीतलं॥ तोयमाचमनीयांसशिरंप्रतिग
ह्यतां॥ आचमनीयंस०॥ पंचामृतं॥ पयश्चदधिसंयुक्तंघृतं
चमधुशर्करा॥ पंचामृतेनस्नपनंप्रीयतांपरमेश्वर॥ पंचामृ
तस्नानंस०॥ गोक्षीरधामदेवेशगोक्षीरेणमयाकृतं॥ स्न
पनंदेवदेवेशगृहाणपरमेश्वर॥ पयस्नानंस०॥ दध्नाचै
वमहादेवस्नपनंक्रियतेसदा॥ गृहाणत्वंमयादत्तंप्रीत्य
र्थंचमयाप्रभो॥ दधिस्नानंस०॥ सर्पिस्नपनदेवेशक्रिय
तेद्यमयाप्रभो॥ गृहाणश्रद्धयादत्तंसुप्रसन्नोभवप्रभो॥

सोम·पू·

३

घृतस्नानंस०॥ इदंमधुमयानीतंतववुष्ट्यर्थमेवच॥ गृहाण
देवदेवेशमधुस्नानमयाप्रभो॥ मधुस्नानंस०॥ शीतयादेव
देवेशास्नपनंक्रियतामया॥ गृहाणदेवदेवेशासुप्रसंनोभ
वत्वरं॥ शर्करास्नानंस०॥ शुद्धंतिसर्वगात्राणिगंगातोये
ननित्यशः॥ अतःसर्वाणिगात्राणिस्थापयेद्यत्नवत्सरा
ट्॥ शुद्धोदकस्नानंस०॥ स्नानानंतरेणआचमनीयंस०॥ ३
सर्वभूताधिवासायसर्वदेवमयायच॥ सर्वलज्जानि
वासार्थंवाससीप्रतिगृह्यतां॥ वस्त्रंस०॥ उपवस्त्रंस०॥

नवभिस्तंतुभिर्युक्तंत्रिगुणंदेवतामयं॥ उपवीतंमयादत्तं
गृहाणपरमेश्वर॥ उपवीतार्थेयज्ञोपवीतंस०॥ यतोगं
धवतिर्भूमिर्भूमिभूताहिपादपाः॥ पूजार्थंपादपानांच
प्रीत्यर्थंप्रतिगृह्यतां॥ चंदनंस०॥ हरिद्रापीतवर्णाचप
रमसौभाग्यदायिनी॥ हरिद्रेनार्चितेदेवीमतःशांतिंप्र
यच्छमे॥ महालक्ष्म्येनमः हरिद्रांस०॥ कुंकुमंकामकंदि
व्यंकामनाकामसंभवः॥ कुंकुमेनार्चितेदेवीमतःशां

तिंप्रयछमे॥कुंकुमंस॰॥कंचुकीसर्वसौभाग्यंलआकामस
दाहृदं॥गृहाणश्रद्धयादेयंसर्वसौख्यप्रदायिनी॥कंचुकींस॰॥
मांग्यतंतुनायुक्तंकंठेबध्नामिसर्वदा॥विष्णुनासर्वलक्ष्मी
चगृह्यतांपरमेश्वरी॥कंठेमंगलसूत्रंस॰॥नेत्रशोभाक
रंनित्यंअंजनंचारुलोचने॥येनकामेनदेवित्वंपूजितासि
महेश्वरी॥श्रीमहालक्ष्म्यैनमः॥नेत्रांजनंस॰॥सर्वसौभा
ग्यद्रव्यंस॰॥आभरणं[illegible]कामार्थेअक्षतांस॰॥स्वभा ४
वसुंदरांगायनानाभक्त्याश्रयायते॥भूषणानिविचित्रा

णिकल्पयामिसुरेश्वर॥आभरणंस॰॥वत्सराजनमस्तु
भ्यंयज्ञराजनमोस्तुते॥यज्ञांगरूपयज्ञेशअश्वत्थायन
मोनमः॥पुष्पंस॰॥अथनामपूजा॥अश्वत्थायनमः॥
पुष्पंस॰॥पिप्पलायनमःपु॰॥चंचलायनमःपु॰॥वत्स
राजायनमःपु॰॥यज्ञराजायनमःपु॰॥यज्ञांगरूपाय॰पु॰॥
यज्ञेशायनमःपुष्पं॰॥यज्ञायनमःपु॰॥मूलेब्रह्मरूपा
यनमःपु॰॥मध्येविष्णुरूपायनमःपु॰॥अग्रेशिवरूपा
यनमःपु॰॥सर्वदेवमयायनमःपु॰॥आमायेनमःपु॰॥

सो·व·पू· सोमायैनमः पु०॥ निर्यासोवृक्षराज्ञानांधूपार्थेकल्पयाम्यहं॥
धर्मरूपेणवर्तंतेअश्वत्थायनमोनमः॥ धूपंस०॥ चक्षुर्दंस
५ र्वलोकानांतिमिरस्यनिवारणं॥ आर्तिक्यंकल्पयेह्वेवाप
रि[illegible]ग्रह्लीष्ववृक्षराट्॥ दीपंस०॥ अन्नाद्भवंतिभूता
निअन्नाद्यज्ञःप्रवर्तते॥ अश्वत्थयज्ञभृतेश्वअन्नंतेक
ल्पयाम्यहं॥ नैवेद्यंस०॥ मध्येपानीयंस०॥ हस्तप्रक्षालनं ५
समं०॥ करोद्वर्तनार्थेचंदनंस०॥ इदंफलंमयादेवस्था
पितंपुरतस्तव॥ तेनमेसफलावाप्तिर्भवेज्जन्मनिज

नि॥ फलेनफलितंसर्वंत्रैलोक्यंसचराचरं॥ तस्मात्फलप्रदा
नेनसफलाश्वमनोरथाः॥ फलंस०॥ पूगीफलंमहद्दिव्यंना
गवल्यादलैर्युतं॥ कर्पूरेलासमायुक्तंतांबूलंप्रतिगृह्यतां॥
५प पुगीफलतांबूलंस०॥ हिरंगर्भगर्भस्थंहेमबीजंविभा
वसोः॥ अनंतपुण्यफलदामतःशांतिंप्रयच्छमे॥ हिरण्य
पुष्पदक्षिणांस०॥ आज्यंचवर्तिसंयुक्तंवह्निनायोजितं
मया॥ दीपंगृहाणदेवेशत्रैलोक्यतिमिरापहं॥ नीराजन
दीपंस०॥ पुष्पांजलिंपशुपतेभवतेकृतोयंसाष्टांगम

सो·व·पू· स्तुचनमः करणंतथेदं ॥ आनंदचिन्मयमनंतगुणंभवंतमु
द्दासयामिहृदमात्मनिपूर्णमूर्ते ॥ इतिमंत्रपुष्पंस० ॥ वेदत्र
६ यंचलोकानांत्रयवर्णात्रयंतथा ॥ देवानांत्रितयंतस्मात्प्र
दक्षिणमयाकृतं ॥ प्रदक्षिणांस० ॥ मूलतोब्रह्मरूपायम
ध्यतोविष्णुरूपिणे ॥ अग्रतःशिवरूपायअश्वत्थायनमो
नमः ॥ नमस्कारान्स० ॥ हेतवेजगतामेवसंसारार्णवसेत
वे ॥ प्रभवेसर्वविद्यानांशंभवेगुरवेनमः ॥ करचरणकृतं ६
वाकायजंकर्मजंवाश्रवणनयनजंवामानसंवापराधं ॥

विहितमविहितंवासर्वमेतत्क्षमस्वजेजेकरुणाब्धेश्रीमहादे
वशंभो ॥ इतिक्षमापनंसमर्पयामि ॥ अथपूर्वोच्चरित०श्री
७ अश्वत्थरूपीलक्ष्मीनारायणप्रीत्यर्थंअमुकद्रव्यादिअष्टोत्त
रशतसंख्याकाभिःप्रतिप्रदक्षिणंएकैकद्रव्यसमर्पण
महंकरिष्ये ॥ अश्वत्थहुतभुग्भोक्तागोविंदस्यसदाश्रयः ॥
अशेषंहरमेपापंवृक्षराजायतेनमः ॥ प्रतिप्रदक्षिणेश्लो
कंपठित्वाप्रदक्षिणंकृत्वा ॥ अंतेगंधादिपंचोपचारैःसंपू

द्वत्या

साम॰पू॰ ज्यउत्तरपूजां॥अद्यपूर्वो॰तिथौश्रीअम्बत्यरूपीलक्ष्मीनारा
यणप्रदक्षिणपूजासांतासिध्यर्थंयथासंभवेब्राह्मणायवा ग
८ यनप्रदानमहंकरिष्ये॥सुवासिनिभ्यःहरिद्राकुंकुमसौभा
ग्यद्रव्यादिदानानिकरिष्ये॥तथाचब्राह्मणपूजनंकरिष्ये॥
उपायनमिदंद्रव्यंव्रतसंपूर्णहेतवे॥वायनंद्विजवर्यायस
हिरण्यंददाम्यहं॥विप्रायवेदविदुषेश्रोत्रियायकुटुंबिने॥ ८
नरकोत्तारणार्थायदीयतेदानमुत्तमं॥अनेनवायनदा

केन

नेनसदक्षिणांसतांबूलेनयथाशक्तिसोपस्करसहितेनअ
मुकव्रामेणेब्राह्मणायलक्ष्मीनारायणप्रीतिंकामयमानस्त
तुभ्यमहंसंप्रददेप्रतिगृह्यतांप्रतिगृह्णामि॥यस्यस्मृत्ये
मेस तिकैमाप्रिंवेदयेत्॥इतिसोमवतीपूजाःसमाप्तः॥

:सोमवतीपूजा:समाप्त: